This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit. The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 1956. विषय धर्मशास्त्र
नाव. नामकरन प्रयोग
लेखक/लिपीकार काशिनाथ गमनभट्ट तेले
पृष्ठ 03 काळ शके 1804. पूर्ण/अपूर्ण

-1956

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M-1956

॥अथनामक्रूरणप्रयोगः प्रारंभः॥पत्रसंख्या॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नामकरणप्र० ४

श्रीगणेशाय नमः॥ अथ नामकरणप्रयोगः॥ अत्र मातापुत्रयोः पितुश्च द्वादश्यामेवाशौचनिवृत्तिः॥ तत्रैकाद
दश्यांस्नानागारकृत्योर्द्वादश्यो विधानात्॥ जन्मतो द्वादशे दिवसे नाम दद्यात्॥ स्वकाले प्राप्तमपि वैधृतिव्यती
पातग्रहणसंक्रांत्यमावास्यापितृश्राद्धदिने पुनःकार्यं॥ गुरुशुक्रास्तबाल्यवार्धक्यमलिकोन वा रमलमासा
दिनिषेधस्तु नास्ति॥ मातापुत्रयोः पितुश्च स्नानं॥ स्वगनतले पिता दिनागारवह्निं कारयित्वा सूतिकाग्निं बहिः परि
हृत्य औपासनाग्निमानीयायतने संस्थाप्य॥ द्वादशे दिवसे असंभवे व्यतीपातादिकुयोगसत्वे वा अष्टादशेहनि
मासे मासान्तरे वा संवत्सरे तीरे वा स्नायां यस्याकस्यांचित्पुण्यतिथौ॥ पारिजातेन्द्र सिंहः॥ छिद्राख्यां पर्वनवमी
हित्वा शेषाः शुभावहा इति॥ चतुर्थी षष्ठ्यष्टमी द्वादशी चतुर्दश्यश्छिद्राः द्वे पर्वणी नवमी चेत्यष्टौ तिथिर्विहाय ॥१॥
शेषास्तिथयो नामकर्मणि वास्ताइत्यर्थः॥ बुधचंद्रेंदुगुरुवासरः शस्ताः मित्रादित्यमघोत्तराः शतभिषक्ता
नीधनिष्ठाच्युतमादेश्विनीवारुणं पौष्णादिनकरसुष्यपुरावौ स्थिरे॥ छिद्रां पंचदशीं विहाय नवमीं कुर्यात् हेष्टमे ॥रां॰कृ॰२॥

श्रीगर्गवंशलाचार्योत्तरपादभागदिवसेनामानि कुर्याच्छिशोरिति॥ मित्रानूराधाः॥ आदित्यं पुनर्वसू॥ मघाः॥ उत्तर
त्रयं॥ शततारकाः॥ अच्युतश्रवण॥ रोहिणी॥ अश्विनौ अश्विनीनक्षत्रं॥ शशांको मृगशिरः॥ पौष्णं रेव
ती॥ दिनकृद्धस्तः॥ राशौ स्थिरे॥ वृषसिंहवृश्चिककुंभलग्नेषु॥ अथ प्रयोगः॥ स्नानस्सूतिकागारशुद्धिश्च द्वाद
श्यामेव॥ स्वकाले नामकरणक्रियायां तु गुरुशुक्रास्तमलमासादिनिषेधो नास्ति॥ कर्ता प्राङ्मुख उपविश्य स्व
दक्षिणतः कुमारसहितां भार्यामुपवेश्याचम्य प्राणानायम्य देशकालौ संकीर्त्य अस्य शिशोः बीजगर्भसमु
द्भवैनोनिबर्हणद्वारा पुर्वर्चोभिवृद्धिद्वारा व्यवहारसिद्धिद्वारा च श्रीपरमेश्वरप्रीत्यर्थं नामकरणाख्यं कर्म करिष्ये
॥तदंगं गणपतिपूजनं पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं च करिष्ये॥ इति संकल्प्य॥ ततोग्निं पार्थि
वनामानमग्निं प्रतिष्ठाप्य समिल्लयमादाय श्रद्धेन हीत्यादिप्रमाण्यायामांतं कृत्वा नामदानहोमकर्मणि या
यक्ष्यमाणा देवतास्ताः सर्वाः परिग्रहीष्यामि॥ इत्यादि व्याहृत्यंतमुक्त्वा॥ प्रधानहोमे धातारं चतुः अनुमतिं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

...रणम्॥ त्वनु: राकां हि: सिनीवालीं हि: कुहूं वा ज्येन अंगहोमे वरुणं हि रित्यादि संस्रावेण त्वं तमुक्तो समिधोग्वाधाय प्र्य
हृत्यं तमुक्तो प्रधानहोमः ॥ ॐ धाता ददातु नो रयिमीशानो जगतस्पतिः ॥ स नः पूर्णेन वावनत् स्वाहा ॥ धात्र इदं०
२॥ ॐ धाता प्रजाया उत राय ईशे धातेदं विश्वं भुवनं जजान ॥ धाता पुत्रं यजमानाय दाता तस्मा उ हव्यं घृतवद्विधेम स्वा
हा ॥ धात्र इदं० ॥ ॐ धाता ददातु नो रयिं प्राचीं जीवातुमक्षितां ॥ वयं देवस्य धीमहि सुमतिं सत्यराधसः स्वाहा ॥
धात्र इदं० ॥ ओं धाता ददातु दाशुषे वसूनि प्रजाकामाय मीढुषे दुरोणे ॥ तस्मै देवा अमृताः संव्ययन्तां विश्वे देवा
सो अदितिः सजोषाः स्वाहा ॥ धात्र इदं० ॥ ॐ अनु नोद्यानुमतिर्यज्ञं देवेषु मन्यतां ॥ अग्निश्च हव्यवाहनो भवतं
दाशुषे मयः स्वाहा ॥ अनुमत्या इदं० ॥ ॐ अन्विदनुमते त्वं मन्यासै शं च नः कृधि ॥ क्रत्वे दक्षाय नो हिनु प्रण आ ॥२॥
यूंषि तारिषः स्वाहा ॥ अनुमत्या इदं० ॥ ॐ अनुमन्यतामनुमन्यमाना प्रजावन्तं रयिमक्षीयमाणं ॥ तस्यै वयं
हेडसि मापि भूम सा नो देवी सुहवा शर्म यच्छतु स्वाहा ॥ अनुमत्या इदं० ॥ ॐ यस्यामिदं प्रदिशि यद्विरोचतेनु ॥रा०सू र॥

मतिं प्रति भूषंत्यायवः ॥ यस्या उपस्थ उर्वंतरिक्षं सा नो देवी सुहवा शर्म यच्छतु स्वाहा ॥ अनुमत्या इदं० ॥ ॐ रा
कामहं सुहवां सुष्टुती हुवे शृणोतु नः सुभगा बोधतु त्मना ॥ सीव्यत्वपः सूच्याच्छिद्यमानया ददातु वीरं शतदा
यमुक्थ्यं स्वाहा ॥ राकाया इदं० ॥ ॐ यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि ॥ ताभिर्नो
अद्य सुमना उपागहि सहस्रपोषं सुभगे रराणा स्वाहा ॥ राकाया इदं० ॥ ॐ सिनीवालि पृथुष्टुके या देवानाम
सि स्वसा ॥ जुषस्व हव्यमाहुतं प्रजां देवि दिदिड्ढि नः स्वाहा ॥ सिनीवाल्या इदं० ॥ ॐ या सुपाणिः स्वंगुरिः सुषूमा ब
हुसूवरी ॥ तस्यै विश्पत्न्यै हविः सिनीवाल्यै जुहोतन नः स्वाहा ॥ सिनीवाल्या इदं० ॥ ॐ कुहूमहं सुभगां विद्मना
पसमस्मिन्यज्ञे सुहवां जोहवीमि ॥ सा नो ददातु श्रवणं पितॄणां तस्यास्ते देवि हविषा विधेम स्वाहा ॥ कुह्वा इदं० ॥ इति ने
त्रोद्वाहुतीर्हुत्वा ॥ ततः इमं मे वरुण त्वादिति द्विर्दत्त्वा होमं पुण्याहवाचनांतं समाप्य ॥ नामगृहानं नवपथमुकुलदेवतो
नाममहालक्ष्मीभक्तरत्यादि ॥ ततो जन्मनक्षत्रीन नामो सनाम तस्य ॥ कृष्णोनंतोच्युतश्चक्री वैकुंठोथ जनार्दनः ॥ उपेंद्रो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुरुषपुरुषोत्तमस्कदेवस्तथाहरिः।।योगीशः पुंडरीकाक्षो मासनामान्यनुक्रमात्।।अत्र यथाचारं चैत्रादिर्मार्गशीर्षादिर्वा क्रमो न
।।ततो व्यवहारिकं नाम।।अथैवं व्यवस्था।।स्वचिमं नाम द्वयं कार्यं।।एकं गुप्तं।।अपरं व्यवहाराय।।व्यवहारिकं नक्ष
।।३।। त्रनाम द्वितीयमिति द्रष्टव्यं।।एवं सोमयाजी तृतीयमिति।।गुप्तं तु नाम पुण्याहवाचनात्पूर्वं शुभे काले कार्यं।।तच्च
मातापितरावेव जानीतः।।यावज्जीवं गुप्तं मौंजीबंधनेवा पुत्रो जानीतोभिवादने।।नक्षत्रनाम स्त्रिपुरुषवा त्रिअ
क्षिप्ताविवादेवतावाचिवा अथवा रेख संख्याक्षुं कुमारप्रतिष्ठाकामः।।चतुरक्षरं ब्रह्मवर्चसकामः।।तच्च घोषवदाद्यं तरस्थं
दीर्घं परं विसर्गांतं वा।।स्तूपसर्गं वा नाम कार्यं।।ज्योतिःशास्त्रोक्तात्यवकहडचक्रानुसारेण जन्मनक्षत्रपादमत्युक्ता
क्षरादिनामतच्च।।चुचेचोला अश्विनी।।लिलुलेलो भरणी।।आइउए कृत्तिका।।वोवावीवू रोहिणी।।वेवोकाकी ।।३।।
मृगशिर।।कूघङछ आर्द्रा।।केकोहाही पुनर्वसू।।हूहेहोड पुष्य।।डिडूडेडो आश्लेषा।।मामीमूमे मघा।।मोटा
टीटू पूर्वा।।टेटोपापी उत्तरा।।पूषणठा हस्त।।पेपोरारी चित्रा।।रूरेरोता स्वाती।।तीतूतेतो विशाखा।।नानीनूने अ ।।शंकर।।

नुराधा।।नोयायीयू ज्येष्ठा।।येयोभाभी मूल।।भूधाफाढा पूर्वाषाढा।।जुजेजोखा अभिजित्।।खाखीखूखे श्रवण।।
गागीगूगे धनिष्ठा।।गोसासीसू शततारका।।सेसोदादी पूर्वाभाद्रपदा।।दुथझञ उत्तराभाद्रपदा।।देदोचाची रेवती
।।इति।।अथ बौधायनोक्तजाताधिकाररचिता अनादिप्रत्ययांतं नक्षत्रं नाम।।तच्च अश्वयुजः।।अपभरणः।।आप
भरणः।।बहुलः।।रोहिणः।।रौहिणः।।मृगशीर्षः।।मार्गशीर्षः।।आर्द्रकः।।आर्द्रः।।पुनर्वसुः।।तिष्यः।।आश्लेषः।।मघः।।
माघः।।फाल्गुनः।।हस्तः।।चित्रः।।चैत्रः।।स्वातिः।।विशाखः।।अनुराधः।।ज्येष्ठः।।मूलकः।।मूलः।।आषाढः।।
अषाढः।।आषाढीयः।।अभिजित्।।अभिजितः।।श्रवणः।।श्रावणः।।श्रविष्ठायः।।शतभिषक्।।शतभिषः।।
प्रोष्ठपादः।।प्रोष्ठपदः।।रेवतः।।रैवतः इति।।एतन्नक्षत्रनाम शर्मांतं ब्राह्मणस्य कार्यं।।अत्र शिष्टाचारः।।तंडुलान्कांस्या
दिपात्रे प्रसार्य।।तदुपरि सुवर्णशलाकया लिख्यंते।।प्रथमं कुलदेवतानाम।।ततो मासनाम।।ततो व्यवहारि
कं।।ततो नक्षत्रं।।चतुर्थं पंक्तिलिखित्वा।।नामदेवताभ्यो नमः इति गंधादि दक्षिणां पंचोपचारैः संपूज्य।।ततः कर्ता कुल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥नामकरणप्रयोग॥ देवता नाम्ना महालक्ष्मीभक्तो सौ तिस्त्वद्दक्षिणतः विद्यमानस्य मातुरुत्संगस्थस्य शिशोर्दक्षिणे कर्णे कथयित्वा॥ नर्य प्रजामित्याद्वि
नाप्रतिष्ठाप्य॥ विप्रैर्नामस्तु प्रतिष्ठितमस्त्विति वाच्यं॥ महालक्ष्मीभक्तोयं भवतः सर्वान्ब्राह्मणानभिवादयते॥ आयुष्मान्भव
॥४॥ तु महालक्ष्मीभक्त इति प्रत्युक्ते॥ अस्मै महालक्ष्मीभक्ताय पुण्याहं भवंतो ब्रुवंत्विति त्रिः॥ ॐ पुण्याहमिति त्रिर्विप्राः॥ एवं स्व
स्तिं भवंतो ब्रुवंत्विति त्रिः॥ ॐ स्वस्तीति त्रिर्विप्राः॥ ॐ ऋद्धिं भवंतो ब्रुवंत्विति त्रिः॥ ॐ ऋद्धिरिति त्रिर्विप्राः॥ एवमशि
श्नामप्रयेपि पुण्याहवाचनं कार्यं॥ ततो नीराजनं कारयित्वा॥ श्रीरस्त्विति तु काप्रजापतिः प्रीयतामित्युक्त्वा पुण्याहवाचनं स
माप्याभिषेकः कार्यः॥ ततः कर्मांगत्वेन दद्याधिका ब्राह्मणभोजनं संकल्प्य ब्राह्मणान् गंधादिनाः संपूज्य भूयसीं दक्षिणां
दत्वा ब्राह्मणेभ्यः आशिषो ग्राह्याः॥ ततः प्रमादात्कुर्वतां कर्म्मै निकर्मसा दुण्यायविष्णुं स्मरेत्॥ शिष्टैरिष्टैश्च भोजनं कुर्यात् ॥४॥
इदं कुमार्या अपि तूष्णीं भवति॥ इति सत्याषाढी हिरण्यकेशीस्मार्तप्रयोगरत्ने संस्कारप्रकरणे वैद्यनाथपायनमहेशभट्टकृतौ
नामकरणप्रयोगः॥ अथ प्रवासादागतेषु चेपितरि वा पुत्रदर्शनेस ति पितुरेथ नैमित्तिकं कर्मोच्यते॥ पितापुत्रेमभिमृशति॥ ॥श्रीशंकर॥

सोमस्य त्वा द्युम्नेनाभिषिञ्चाम्यग्नेस्तेजसा सूर्यस्य वर्चसेति॥ ततो मूर्ध्न्याघ्राति॥ प्रवरत्रां त्वा हुंकारेणाभिजिघ्राम्यमुकशर्म
न्॥ आयुषे वर्चसे हुंतिभि॥ ततः स्वदक्षिणेन हस्तेन पुत्रस्य दक्षिणं हस्तं सांगुष्ठं गृह्णाति॥ अग्निरायुष्मान्स वनस्पति
भिरायुष्मांस्तेन त्वायुषायुष्मंतं करोमि॥ सोम आयुष्मान्स ओषधीभिरायुष्मांस्तेन त्वायुषायुष्मंतं करोमि॥ यज्ञ आयुष्मान्स दक्षिणा
भिरायुष्मांस्तेन त्वायुषायुष्मंतं करोमि॥ ब्रह्मायुष्मत्तद्ब्राह्मणैरायुष्मत्तेन त्वायुषायुष्मंतं करोमि॥ देवा आयुष्मंतस्तेमृतेनायुष्मं
तस्तेन त्वायुषायुष्मंतं करोमि॥ ततः आयुष्टे विश्वतो दधदयमग्निर्वरेण्यः॥ पुनस्ते प्राण आयतु परा यक्ष्मं सुवामि ते॥ अग्ने
पृथिव्यां प्रतितिष्ठ वायावंतरिक्षे सूर्ये दिवि याः स्वस्तिमग्निर्वायुरादित्यश्चंद्रमा आपोनुसंचरंति ताः स्वस्ति मनुसंचर अ
मुकशर्मन्॥ प्राणस्य ब्रह्मचार्यभूः अमुकशर्मन्॥ इति मंत्रद्वयं पुत्रस्य दक्षिणे कर्णे जपति॥ ततः आयुर्दा अग्ने हविषो जुषाणो घृ
तप्रतीको घृतयोनिरेधि॥ घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभिरक्षतादिमं॥ अग्ने ष्टे० इति मंत्रद्वयमुत्तरे॥ इदं पावकीवंश्चावे
दुपनयनं वा पितुर्नैमित्तिकं॥ इदं कुमार्या अपि तूष्णीं भवति॥ इति॥ श्रीहरिहरेश्वरार्पणमस्तु॥ शके १८०४ चित्रभानुनाम
संवत्सरे आश्विनकृष्ण चतुर्दश्यां इदं पुस्तकं लेले इत्युपनामकवामनभट्टस्य सूनुना काशिनाथेन लिखितं॥ श्रीशंकर॥ श्री॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ इति नामस्मरणप्रयोगः समाप्तः ॥

M-1956

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=24.07.19 13:14
,TRANSFERRED=2019/07/24 at 16:17:22
,PAGES=7
,TYPE=STD
,NAME=S0001104
,Book Name=M-1956-NAMKARAN PRAYOG
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection